# Panchikaranam or Panchikarana Varttikam

# પઞ્ચીકરણં અથવા પઞ્ચીકરણવાર્ત્તિકમ્

## Document Information

Text title : panchIkaraNam

File name : paJNchi.itx

Category : vedanta, shankarAchArya

Location : doc_z_misc_shankara

Author : machchha.nkarAchArya

Transliterated by : Dhrup Chand

Proofread by : Dhrup Chand, Sunder Hattangadi and David Lyttle dhlyttle at hotmail.com

Description-comments : Commentary by Sureshwaracharya

Latest update : April 30, 2009, September 19, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 19, 2021

*sanskritdocuments.org*

Panchikaranam or Panchikarana Varttikam

# પઞ્ચીકરણં અથવા પઞ્ચીકરણવાર્ત્તિકમ્

ૐ

શ્રીમચ્છઙ્કરાચાર્યવિરચિતમ્ પઞ્ચીકરણમ્

ૐ પઞ્ચીકૃતમ્પઞ્ચમહાભૂતાનિ તત્કાર્યં
ચ સર્વં વિરાડિત્યુચ્યતે ।
એતત્સ્થુલશરિરમાત્મનઃ ।
ઇન્દ્રિયૈરર્થોપલબ્ધિર્જાગરિતમ્ ।
તદુભયાભિમાન્યાત્મા વિશ્વઃ ।
એતત્ ત્રયમકારઃ ॥ ૧॥

અપઞ્ચીકૃતપઞ્ચમહાભૂતાનિ પઞ્ચતન્માત્રાણિ
તત્કાર્યં ચ પઞ્ચ પ્રાણાઃ દશેન્દ્રિયાણિ
મનોબુદ્ધિશ્ચેતિ સપ્તદશકં લિઙ્ગમ્ ભૌતિકં
હિરણ્યગર્ભ ઇત્યુચ્યતે ।
એતત્સૂક્ષ્મશરિરમાત્મનઃ ॥ ૨॥

કરણેષૂપસંહૃતેષુ જાગરિતસંસ્કારજઃ પ્રત્યયઃ
સવિષયઃ સ્વપ્ન ઇત્યુચ્યતે ।
યદુભયાભિમાન્યાત્મા તૈજસઃ ।
એતત્ ત્રયમુકારઃ ॥ ૩॥

શરીરદ્વયકારણમાત્માજ્ઞાનં
સાભાસમવ્યાકૃતમિત્યુચ્યતે ।
એતત્ કારણશરીરમાત્મનઃ ।
તચ્ચ ન સન્નાસન્નાપિ સદસન્ન ભિન્નં નાભિન્નં
નાપિ ભિન્નાભિન્નં કુતશ્ચિત્
ન નિરવયવં ન સાવયવં
નોભયં કિન્તુ

કેવલબ્રહ્માત્મૈકત્વજ્ઞાનાપનોદ્યમ્ ॥ ૪॥

સર્વપ્રકારજ્ઞાનોપસંહારે બુદ્ધેઃ
કારણાત્મનાઽવસ્થાનં સુષુપ્તિઃ ।
તદુભયામિમાન્યાત્મા પ્રાજ્ઞઃ ।
એતત્ ત્રયમ્ મકારઃ ॥ ૫॥

અકાર ઉકારે ઉકારો મકારે મકાર ઓઙ્કારે
ઓઙ્કારોઽહમ્યેવ ।
અહમાત્મા સાક્ષી કેવલશ્ચિન્માત્રસ્વરૂપઃ
નાજ્ઞાનં નાપિ તત્કાર્યં કિન્તુ
નિત્યશુદ્ધબુદ્ધમુક્તસત્યસ્ભાવં
પરમાનન્દાદ્વયં પ્રત્યગ્ભૂતચૈતન્યં બ્રહ્મૈ
વાહમસ્મીત્યભેદેનાવસ્થાનં સમાધિઃ ॥ ૬॥

તત્ત્વમસિ બ્રહ્મહમસ્મિ પ્રજ્ઞાનમાનન્દં બ્રહ્મ
અયમાત્મા બ્રહ્મ ઇત્યાદિશ્રુતિભ્યઃ ॥ ૭॥

ઇતિ પઞ્ચીકરણં ભવતિ ॥

ઇતિ શ્રીશઙ્કરાચાર્યવિરચિતં પઞ્ચીકરણમ્ ॥

---

પઞ્ચીકરણવાર્ત્તિકમ્

શ્રીસુરેશ્વરાચાર્યકૃત

ૐકારઃ સર્વવેદાનાં સારસ્તત્ત્વપ્રકાશકઃ ।
તેન ચિત્તસમાધાનં મુમુક્ષૂણાં પ્રકાશ્યતે ॥ ૧॥

આસીદેકં પરં બ્રહ્મ નિત્યમુક્તમવીક્રિયમ્ ।
તત્સ્વમાયાસમાવેશાદ્ બીજમવ્યાકૃતાત્મકમ્ ॥ ૨॥

તસ્માદાકાશમુત્પન્નં શબ્દતન્માત્રરૂપકમ્ ।
સ્પર્શાત્મકસ્તતો વાયુસ્તેજોરૂપાત્મકં તતઃ ॥ ૩॥

આપો રસાત્મિકાસ્તસ્માત્તાભ્યો ગન્ધાત્મિકા મહિ ।
શબ્દૈકગુણમાકાશં શબ્દસ્પર્શગુણો મરૂત્ ॥ ૪॥

શબ્દસ્પર્શરૂપગુણૈસ્ત્રિગુણં તેજ ઉચ્યતે ।
શબ્દસ્પર્શરૂપરસગુણૈરાપશ્ચતુર્ગુણાઃ ॥ ૫॥

શબ્દસ્પર્શરૂપરસગન્ધૈઃ પઞ્ચગુણા મહી ।
તેભ્યઃ સમભવત્સૂત્રં ભૂતં સર્વાત્મકં મહત્ ॥ ૬॥

તતઃ સ્થૂલાનિ ભૂતાનિ પઞ્ચ તેભ્યો વિરાડભૂત્ ।
પઞ્ચીકૃતાનિ ભૂતાનિ સ્થૂલાનીત્યુચ્યતે બુધૈઃ ॥ ૭॥

પૃથિવ્યાદીનિ ભૂતાનિ પ્રત્યેકં વિભજેદ્ દ્વિધા ।
એકૈકં ભાગમાદાય ચતુર્ધા વિભજેત્પુનઃ ॥ ૮॥

એકૈકં ભાગમેકસ્મિન્ ભૂતે સંવેશયેત્ક્રમાત્ ।
તતશ્ચાકાશભૂતસ્ય ભાગાઃ પઞ્ચ ભવન્તિ હિ ॥ ૯॥

વાય્વાદિભાગાશ્ચત્વારો વાય્વાદિષ્વેવમાદિશેત્ ।
પઞ્ચીકરણમેતત્સ્યાદિત્યહુસ્તત્ત્વવેદિનઃ ॥ ૧૦॥

પઞ્ચકૃતાનિ ભૂતાનિ તત્કાર્યં ચ વિરાડ્ ભવેત્ ।
સ્થૂલં શરીરમેતત્સ્યાદશરીરસ્ય ચાત્મનઃ ॥ ૧૧॥

અધિદૈવતમધ્યાત્મમધિભૂતમિતિ ત્રિધા ।
એકં બ્રહ્મ વિભાગેન ભ્રમાદ્ભાતિ ન તત્ત્વતઃ ॥ ૧૨॥

ઇન્દ્રિયૈરર્થવિજ્ઞાનં દેવતાનુગ્રહાન્વિતૈઃ ।
શબ્દાદિવિષયં જ્ઞાનં તજ્જાગરિતમુચ્યતે ॥ ૧૩॥

શ્રોત્રમધ્યાત્મમિત્યુક્તં શ્રોતવ્યં શબ્દલક્ષણમ્ ।
અધિભૂતં તદિત્યુક્તં દિશસ્તત્રાધિદૈવતમ્ ॥ ૧૪॥

ત્વગધ્યાત્મમિતિ પ્રોક્તં સ્પ્રષ્ટવ્યં સ્પર્શલક્ષણમ્
અધિભૂતં તદિત્યુક્તં વાયુસ્તત્રધિદૈવતમ્ ॥ ૧૫॥

ચક્ષુરધ્યાત્મમિત્યુક્તં દ્રષ્ટવ્યં રૂપલક્ષણમ્ ।
અધિભૂતં તદિત્યુક્તમાદિત્યોઽત્રાધિદૈવતમ્ ॥ ૧૬॥

જિહ્વાઽધ્યાત્મં તયાઽસ્વાદ્યમાધિભૂતં રસાત્મકમ્ ।
વરૂણો દેવતા તત્ર જિહ્વાયામધિદૈવતમ્ ॥ ૧૭॥

ઘ્રાણમધ્યાત્મમિત્યુક્તં ઘ્રાતવ્યં ગન્ધલક્ષણમ્ ।
અધિભૂતં તદિત્યુક્તં પૃથિવ્યત્રાધિદૈવતમ્ ॥ ૧૮॥

વાગધ્યાત્મમિતિ પ્રોક્તં વક્તવ્યં શબ્દલક્ષણમ્ ।

અધિભૂતં તદિત્યુક્તમગ્નિસ્તત્રાધિદૈવતમ્ ॥ ૧૯॥

હસ્તાવધ્યાત્મમિત્યુક્તમાદાતવ્યં ચ યદ્ભવેત્ ।
અધિભૂતં તદિત્યુક્તમિન્દ્રસ્તત્રાધિદૈચતમ્ ॥ ૨૦॥

પાદાવધ્યાત્મમિત્યુક્તં ગન્તવ્યં તત્ર યદ્ભવેત્ ।
અધિભૂતં તદિત્યુક્તં વિષ્ણુસ્તત્રાધિદૈવતમ્ ॥ ૨૧॥

પાયુરિન્દ્રિયમધ્યાત્મં વિસર્ગસ્તત્ર યો ભવેત્ ।
અધિભૂતં તદિત્યુક્તમ્ મૃત્યુસ્તત્રાધિદૈવતમ્ ॥ ૨૨॥

ઉપસ્થેન્દ્રિયમધ્યાત્મં સ્ત્ર્યાધાનન્દસ્ય કારણમ્
અદિભૂતં તદિત્યુક્તમધિદૈવં પ્રજાપતિઃ ॥ ૨૩॥

મનોઽધ્યાત્મમિતિ પ્રોક્તં મન્તવ્યં તત્ર યદ્ભવેત્ ।
અધિભૂતં તદિત્યુક્તં ચન્દ્રસ્તત્રાધિદૈવતમ્ ॥ ૨૪॥

બુદ્ધિરધ્યાત્મમિત્યુક્તં બોદ્ધવ્યં તત્ર યદ્ભવેત્ ।
અધિભૂતં તદિત્યુક્તમધિદૈવં બૃહસ્પતિઃ ॥ ૨૫॥

અહઙ્કારસ્તથાઽધ્યાત્મમહઙ્કર્તવ્યમેવ ચ ।
અધિભૂતં તદિત્યુક્તં રુદ્રસ્તત્રાધિદૈવતમ્ ॥ ૨૬॥

ચિતમધ્યાત્મમિત્યુક્તં ચેતવ્યં તત્ર યદ્ભવેત્ ।
અધિભૂતં તદિત્યુક્તં ક્ષેત્રજ્ઞોઽત્રાધિદૈવતમ્ ॥ ૨૭॥

તમોઽધ્યાત્મમત્મિતિ પ્રોક્તં વિકારસ્તત્ર યો ભવેત્ ।
અધિભૂતં તદિત્યુક્તમીશ્વરોઽત્રાધિદૈવતમ્ ॥ ૨૮॥

બાહ્યાન્તઃકરણૈરેવં દેવતાનુગ્રહાન્વિતૈઃ ।
સ્વં સ્વં ચ વિષ્યજ્ઞાનં તજ્જાગરિતમુચ્યતે ॥ ૨૯
યેયં જાગરિતાવસ્થા શરીરં કરણાશ્રયમ્ ।
યસ્તયોરભિમાની સ્યદ્વિશ્વ ઇત્યભિધીયતે ॥ ૩૦॥

વિશ્વં વૈરાજરૂપેણ પશ્યેદ્ભેદનિવૃત્તયે ।
જ્ઞાનેન્દ્રિયાણિ પઞ્ચૈવ પઞ્ચ કર્મેન્દ્રિયાણિ ચ ॥ ૩૧॥

શ્રોત્રત્વઙ્નયનઘ્રાણજિહ્વા ધીન્દ્રિયપઞ્ચકમ્ ।
વાક્પાણિપાદપાયૂપસ્થાઃ કર્મેન્દ્રિયપઞ્ચકમ્ ॥ ૩૨॥

મનોબુદ્ધિરહઙ્કારશ્ચિત્તં ચેતિ ચતુષ્ટયમ્ ।

સઙ્કલ્પાખ્યં મનોરૂપં બુદ્ધિર્નિશ્ચયરૂપિણી ॥ ૩૩॥

અભિમાનાત્મકસ્તદ્વદહઙ્કારઃ પ્રકીર્તિતઃ ।
અનુસન્ધાનરૂપમ્ ચ ચિત્તમિત્યભિધીયતે ॥ ૩૪॥

પ્રાણોઽપાનસ્તથા વ્યાન ઉદાનાખ્યસ્તથૈવ ચ ।
સમાનશ્ચેતિ પઞ્ચૈતાઃ કિર્તિતાઃ પ્રણવૃત્તયઃ ॥ ૩૫॥

ખવાવ્યગ્ન્યમ્બુક્ષિતયો ભૂતસૂક્ષ્માણિ પઞ્ચ ચ ।
અવિદ્યાકામકર્માણિ લિઙ્ગં પુર્યેષ્ટકં વિદુઃ ॥ ૩૬॥

એતત્સૂક્ષ્મશરીરં સ્યાન્માયિકં પ્રાત્યગાત્મનઃ ।
કરણોપરમે જાગ્રત્સઙ્કારોત્થં પ્રબોધવત્ ॥ ૩૭॥

ગ્રાહ્યગ્રાહકરૂપેણ સ્ફુરણં સ્વપ્ન ઉચ્યતે ।
અભિમાની તયોર્યસ્તુ તૈજસઃ પરિકીર્તિતઃ ॥ ૩૮॥

હિરણ્યગર્ભરૂપેણ તૈજસં ચિન્તયેદ્ બુધઃ ।
ચૈતન્યાભાસખચિતં શરીરદ્વયકારણમ્ ॥ ૩૯॥

આત્માજ્ઞાનં તદવ્યક્તમવ્યાકૃતમિતીર્યતે ।
ન સન્નાસન્ન સદસદ્ભિન્નાભિન્નં ન ચાત્મનઃ ॥ ૪૦॥

ન સભાગં ન નિર્ભાગં ન ચાપ્યુભયરૂપકમ્ ।
બ્રહ્માત્મૈકત્વવિજ્ઞાનહેયં મિથ્યાત્વકારણાત્ ॥ ૪૧॥

જ્ઞાનાનામુપસંહારો બુદ્ધેઃ કરણતાસ્થિતિઃ ।
વટબીજે વટસ્યેવ સુષુપ્તિરભિધીયતે ॥ ૪૨॥

અભિમાની તયોર્યસ્તુ પ્રાજ્ઞ ઇત્યભિધીયતે ।
જગત્કારણરૂપેણ પ્રાજ્ઞાત્માનં વિચિન્તયેત્ ॥ ૪૩॥

વિશ્વતૈજસસૌષુપ્ત વિરાટ્ સૂત્રાક્ષરાત્મભિઃ ।
વિભિન્નમિવ સંમોહાદેકં તત્ત્વં ચિદાત્મકમ્ ॥ ૪૪॥

વિશ્વાદિકત્રયં યસ્માદ્વૈરાજાદિત્રયાત્મકમ્ ।
એકત્વેનૈવ સમ્પશ્યેદન્યાભાવપ્રસિદ્ધયે ॥ ૪૫॥

ૐકારમાત્રમખિલં વિશ્વપ્રાજ્ઞાદિલક્ષણમ્ ।
વાચ્યવાચકતાભેદાદ્ભેદેનાનુપલબ્ધિતઃ ॥ ૪૬॥

અકારમાત્રં વિશ્વઃ સ્યાદુકારસ્તૈજસઃ સ્મૃતઃ ।
પ્રાજ્ઞો મકાર ઇત્યેવં પરિપશ્યેત્ક્રમેણ તુ ॥ ૪૭॥

સમાધિકાલાત્પ્રાગેવં વિચિન્ત્યાતિપ્રયત્નતઃ ।
સ્થૂલસૂક્ષ્મક્રમાત્સર્વં ચિદાત્મનિ વિલાપયેત્ ॥ ૪૮॥

અકારં પુરુષં વિશ્વમુકારે પ્રવિલાપયેત્ ।
ઉકારં તૈજસં સૂક્ષ્મં મકારે પ્રવિલાપયેત્ ॥ ૪૯॥

મકારં કરણં પ્રાજ્ઞં ચિદાત્મનિ વિલાપયેત્ ।
ચિદાત્માઽહં નિત્યશુદ્ધબુદ્ધમુક્તસદદ્વયઃ ॥ ૫૦॥

પરમાનન્દસન્દોહવાસુદેવોઽહમોમિતિ ।
જ્ઞાત્વા વિવેચકં ચિત્તં તત્સાક્ષિણિ વિલાપયેત્ ॥ ૫૧॥

ચિદાત્મનિ વિલીનં ચેત્તચ્ચિત્તં નૈવ ચાલયેત્ ।
પૂર્ણબોધાત્મનાઽસીત પૂર્ણાચલસમુદ્રવત્ ॥ ૫૨॥

એવં સમાહિતો યોગી શ્રદ્ધભક્તિસમન્વિતઃ ।
જિતેન્દ્રિયો જિતક્રોધઃ પશ્યેદાત્માનમદ્વયમ્ ॥ ૫૩॥

આદિમધ્યાવસાનેષુ દુઃખં સર્વમિદં યતઃ ।
તસ્માત્સર્વં પરિત્યજ્ય તત્ત્વનિષ્ઠો ભવેત્સદા ॥ ૫૪॥

યઃ પશ્યેત્સર્વગં શાન્તમાનન્દાત્માનમદ્વયમ્ ।
ન તેન કિંચિદાપ્તવ્યં જ્ઞાતવ્યં વાવશિષ્યતે ॥ ૫૫॥

કૃતકૃત્યો ભવેદ્વિદ્વાઞ્જીવન્મુક્તો ભવેત્સદા ।
આત્મન્યેવારૂઢભાવો જગદેતન્ન વીક્ષતે ॥ ૫૬॥

કદાચિદવ્યવહારે તુ દ્વૈતં યદ્યપિ પશ્યતિ ।
બોધાત્મવ્યતિરેકેણ ન પશ્યતિ ચિદન્વયાત્ ॥ ૫૭॥

કિન્તુ પશ્યતિ મિથ્યૈવ દિઙ્ મોહેન્દુવિભાગવત્ ।
પ્રતિભાસઃ શરીરસ્ય તદાઽપ્રારબ્ધસઙ્ક્ષયાત્ ॥ ૫૮॥

તસ્ય તાવદેવ ચિરમિત્યાદિ શ્રુતિરબ્રવીત્ ।
પ્રારબ્ધસ્યાનુવૃત્તિસ્તુ મુક્તસ્યાભાસમાત્રતઃ ॥ ૫૯॥

સર્વદા મુક્ત એવ સ્યાજ્જ્ઞાતતત્ત્વઃ પુમાનસૌ ।
પ્રારબ્ધભોગશેષસ્ય  સઙ્ક્ષયે તદનન્તરમ્ ॥ ૬૦॥

અવિદ્યાતિમિરાતીતં સર્વાભાસવિવર્જિતમ્ ।
ચૈતન્યમમલં શુદ્ધં મનોવાચામગોચરમ્ ॥ ૬૧॥

વાચ્યવાચકનિર્મુક્તં હેયોપાદેયવર્જિતમ્ ।
પ્રજ્ઞાનઘનમાનન્દં વૈષ્ણવં પદમશ્નુતે ॥ ૬૨॥

ઇદં પ્રકરણં યત્નાજ્જ્ઞાતવ્યં ભગવત્તમૈઃ ।
અમાનિત્વાદિનિયમૈર્ગુરુભક્તિપ્રસાદતઃ ॥ ૬૩॥

ઇમાં વિદ્યાં પ્રયત્નેન યોગી સન્ધ્યાસુ સર્વદા ।
સમભ્યસેદિહામુત્રભોગાનાસક્તધીઃ સુધીઃ ॥ ૬૪॥

ઇતિ શ્રીમત્સુરેશ્વરાચાર્યવિરચિતં પઞ્ચીકરણવાર્ત્તિકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Dhrup Chand
Proofread by Sunder Hattangadi and David Lyttle

*Panchikaranam or Panchikarana Varttikam*
pdf was typeset on September 19, 2021

Please send corrections to *sanskrit@cheerful.com*